# Narayanasukta

# નારાયણસૂક્તમ્

## Document Information

Text title : naaraayaNasuuktaM

File name : narayanasukta.itx

Category : sUkta, veda, narayana, svara

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Rajagopal Iyer (rajsand at yahoo.com)

Proofread by : Rajagopal Iyer, Swami Mahayogananda mahayogananda at vedanta.org

Description-comments : 10th prapAThaka, 13th anuvAka, 1 and 2

Latest update : December 30, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# નારાયણસૂક્તમ્

તૈત્તિરીયારણ્યકમ્, પ્રપાઠકઃ - ૧૦ અનુવાકઃ - ૧૩

(૧૦.૧૩.૧ ૧૦.૧૩.૨)

ૐ સહ નાવવતુ। સહ નૌ ભુનક્તુ। સહ વીર્યં કરવાવહૈ ।

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ ॥ સહસ્રશીર્ષં દેવં વિશ્વાક્ષં વિશ્વશમ્ભુવં ।

વિશ્વં નારાયણં દેવમક્ષરં પરમં પદમ્ ।

વિશ્વતઃ પરમાન્નિત્યં વિશ્વં નારાયણꣳ હરિમ્ ।

વિશ્વમેવેદં પુરુષસ્તદ્વિશ્વમુપજીવતિ ।

પતિં વિશ્વસ્યાત્મેશ્વરꣳ શાશ્વતꣳ શિવમચ્યુતમ્ ।

નારાયણં મહાજ્ઞેયં વિશ્વાત્માનં પરાયણમ્ ।

નારાયણપરો જ્યોતિરાત્મા નારાયણઃ પરઃ ।

નારાયણ પરં બ્રહ્મ તત્ત્વં નારાયણઃ પરઃ ।

નારાયણપરો ધ્યાતા ધ્યાનં નારાયણઃ પરઃ ।

યચ્ચ કિઞ્ચિજ્જગત્સર્વં દૃશ્યતે શ્રૂયતેઽપિ વા ॥

અન્તર્બહિશ્ચ તત્સર્વં વ્યાપ્ય નારાયણઃ સ્થિતઃ ।

અનન્તમવ્યયં કવિꣳ સમુદ્રેઽન્તં વિશ્વશમ્ભુવમ્ ।

પદ્મકોશ પ્રતીકાશꣳ હૃદયં ચાપ્યધોમુખમ્ ।

અધો નિષ્ટ્યા વિતસ્યાન્તે નાભ્યામુપરિ તિષ્ઠતિ ।

જ્વાલમાલાકુલં ભાતિ વિશ્વસ્યાયતનં મહત્ ।

સન્તતꣳ શિલાભિસ્તુલમ્બત્યાકોશસન્નિભમ્ ।

તસ્યાન્તે સુષિરꣳ સૂક્ષ્મં તસ્મિન્ સર્વં પ્રતિષ્ઠિતમ્ ।
તસ્ય મધ્યે મહાનગ્નિર્વિશ્વાર્ચિર્વિશ્વતોમુખઃ ।
સોઽગ્રભુગ્વિભજન્તિષ્ઠન્નાહારમજરઃ કવિઃ ।
તિર્યગૂર્ધ્વમધશ્શાયી રશ્મયસ્તસ્ય સન્તતા ।
સન્તાપયતિ સ્વં દેહમાપાદતલમસ્તકઃ ।
તસ્ય મધ્યે વહ્નિશિખા અણીયોર્ધ્વા વ્યવસ્થિતઃ ।
નીલતોયદમધ્યસ્થાદ્વિદ્યુલ્લેખેવ ભાસ્વરા ।
નીવારશૂકવત્તન્વી પીતા ભાસ્વત્યણૂપમા ।
તસ્યાઃ શિખાયા મધ્યે પરમાત્મા વ્યવસ્થિતઃ ।
સ બ્રહ્મ સ શિવઃ સ હરિઃ સેન્દ્રઃ સોઽક્ષરઃ પરમઃ સ્વરાટ્ ॥
ઋતꣳ સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણપિઙ્ગલમ્ ।
ઊર્ધ્વરેતં વિરૂપાક્ષં વિશ્વરૂપાય વૈ નમો નમઃ ।
ૐ નારાયણાય વિદ્મહે વાસુદેવાય ધીમહિ ।
તન્નો વિષ્ણુઃ પ્રચોદયાત્ ।

Encoded with Accents by Rajagopal Iyer

Proofread by Rajagopal Iyer, Swami Mahayogananda

*Narayanasukta*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*